# 57 - सप्तपञ्चाश दशकम्
# प्रलम्बासुर वधम्

रामसखः क्वापि दिने कामद भगवन् गतो भवान् विपिनम् ।
सूनुभि रपि गोपानां धेनुभि रभि संवृतो लसत्वेषः ॥ ॥57-1॥

सन्दर्शयन् बलाय स्वैरं वृन्दावन श्रियं विमलाम् ।
काण्डीरैस् सह बालैरः भाण्डीरकमा गमो वटं क्रीडन् ॥ ॥57-2॥

तावत् तावक निधन स्पृहयालुः गोप मूर्ति रदयालुः ।
दैत्यः प्रलम्ब नामा प्रलम्ब बाहुं भवन्त मापेदे ॥ ॥57-3॥

जानन् नप्यविजानन् निव तेन समं निबद्ध सौहार्दः ।
वट निकटे पटु पशुप व्याबद्धं द्वन्द्व युद्ध मारब्धाः ॥ ॥57-4॥

गोपान् विभज्य तन्वन् सङ्घं बल भद्रकं भवत्क मपि ।
त्वत्बल भीरुं दैत्यं त्वत्बल गत मन्व मन्यथा भगवन् ॥ ॥57-5॥

कल्पित विजेतृ वहने समरे परयूथगं स्वदयिततरम् ।
श्रीदामान मधत्थाः पराजितो भक्त दासतां प्रथयन् ॥ ॥57-6॥

एवं बहुषु विभूमन् बालेषु वहत्सु वाह्य मानेषु ।
राम विजितः प्रलम्बो जहार तं दूरतो भवत्भीत्या ॥ ॥57-7॥

त्वत् दूरं गमयन्तं तं दृष्ट्वा हलिनि विहित गरिम भरे ।
दैत्यस् स्वरूप मागाद् यद्रूपात् सहि बलोऽपि चकितोऽभूत् ॥ ॥57-8॥

उच्च तया दैत्य तनोः त्वन्मुख मालोक्य दूरतो रामः ।
विगत भयो दृढ मुष्ट्या भृश दुष्टं सपदि पिष्टवा नेनम् ॥ ॥57-9॥

हत्वा दानव वीरं प्राप्तं बल मालि लिङ्गिथ प्रेम्णा ।
तावन् मिलतोर् युवयोः शिरसि कृता पुष्प वृष्टि रमर गणैः ॥57-10॥

आलम्बो भुवनानां प्रालम्बं निधन मेव मारचयन् ।
कालं विहाय सद्यः लोलम्ब रुचे हरे हरेः क्लेशान् ॥ ॥57-11॥

॥ सदा सर्वत्र गोविन्द नाम संकीर्तनम् गोविन्दा....गोविन्दा ॥
॥ श्री गुरुवायूरप्पा शरणम् श्री हरये नमः॥